කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

දුරස්ථ සහ අඛණ්ඩ අධ්‍යාපන කේන්ද්‍රය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෙවන පරීක්ෂණය (බාහිර) - 2016

2022 නොවැම්බර් - 2023 ජනවාරි

මානවශාස්ත්‍ර පීඨය

සංස්කෘත (පැරණි නිර්දේශය)

සංස්කෘත කාව්‍ය විචාරය හා නාට්‍ය විචාරය, බෞද්ධ සංස්කෘත සාහිත්‍යය

**SANS – E 3015**

පළමු ප්‍රශ්නයට සහ තවත් ප්‍රශ්න හතරකට (04) පිළිතුරු සපයන්න.

ප්‍රශ්න සංඛ්‍යාව : 08 යි. කාලය : පැය 03 යි.

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතුරෙන් හතරක් (04) සිංහලයට පරිවර්තනය කරන්න.

I

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तं आहुस्तं अन्ये ।
केचिद्वाचां स्थितं अविषये तत्त्वं ऊचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ।। १.१

बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरिति संज्ञितः, परम्परया यः समाम्नातपूर्वः सम्यकासमन्तात्म्नातः प्रकटितः । तस्य सहृदयजनमनःप्रकाशमानस्याप्यभावं अन्ये जगदुः । तदभाववादिनां चामी विकल्पाः सम्भवन्ति । तत्र केचिदाचक्षीरन्शब्दार्थशरीरं तावत्काव्यं । तत्र च शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव । अर्थगताश्चोपमादयः । वर्णसङ्घटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते । तदनतिरिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि गताः श्रवणगोचरं । रीतयश्च वैदर्भीप्रभृतयः । तद्व्यतिरिक्तः कोऽयं ध्वनिर्नामेति । अन्ये ब्रूयुःनास्त्येव ध्वनिः । प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः सहृदयहृदयाह्लादिशब्दार्थमयत्वं एव काव्यलक्षणं । न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सम्भवति । न च तत्समतान्तःपातिनः सहृदयान्कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितां अवलम्बते ।

*ध्वन्यालोक*

II

अपादः पदसंतानो गद्यं आख्यायिका कथा
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल । । १.२३ । ।
नायकेनैव वाच्यान्या नायकेनेतरेण वा
स्वगुणाविष्क्रियादोषो नात्रा भूर्तार्थशंसिनः । । १.२४ । ।
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदकारणं (व्ल्. लक्षणम्) । । १.२५ । ।
वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वम् च भेदकम्
चिह्नं आख्यायिकायाश्चेत्प्रसङ्गेन कथास्वपि । । १.२६ । ।
आर्यादिवत्प्रवेशः किं न वक्त्रापरवक्त्रयोः
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वस्तु किं ततः । । १.२७ । ***काव्यादर्शे***

III

अथ हास्यो नाम हासस्थायिभावात्मकः ।
स च विकृतपरवेषालङ्कारधार्ष्ट्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शनदोषोदाहरणादिभिर्विभावैरुत्पद्यते ।
तस्योष्ठनासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।
व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधादयः । द्विविधश्चायमात्मस्थः परस्थश्च ।
यदा स्वयं हसति तदाऽत्मस्थः । यदा तु परं हासयति तदा परस्थः ।
अत्रानुवंश्ये आर्ये भवतः ।

विपरितालङ्कारैर्विकृताचराभिधानवेषैश्च ।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः । । ६.४९ । ।
विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च ।
हासयति जनं यस्मात्तस्मज्ज्ज्ञेयो रसो हास्यः । । ६.५० । ।
स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रसः ।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः । । ६.५१ । । ***नाटयशास्त्रे***

IV

वयमप्येदृशाः स्यामो बुद्धा लोके अनुत्तराः ।
संधाभाष्येण देशेन्तो बुद्धबोधिमनुत्तराम् ॥ ३७ ॥

यच्छुतं कृतमस्माभिरस्मिँल्लोके परत्र वा ।
आरागितम्च यद्बुद्धः प्रार्थना भोतु बोधये ॥ ३८ ॥

अथ खल्वायुष्मान् सारिपुत्रो भगवन्तमेतदवोचत्–निष्काङ्क्षोऽस्मि भगवन् विगतकथंकथो भगवतोऽन्तिकात् संमुखमितमात्मनो व्याकरणं श्रुत्वा अनुत्तरायां सम्यक्संबोधौ । यानि च इमानि भगवन् द्वादश वशीभूतशतानि भगवता पूर्वं शैक्षभूमौ स्थापिता नि एवमववदितानि एवमनुशिष्टान्यभूवन् एतत्पर्यवसानो मे भिक्षवो धर्मविनयो यदिदं जातिजराव्याधिमरणशोकसमतिक्रमो निर्वाणसमवसरणः । इमे च भगवन् द्वे भिक्षुसहस्रे शैक्षाशैक्षाणां भगवतः श्रावकाणां सर्वेषामात्मदृष्टि-भवदृष्टिविभवदृष्टिसर्वदृष्टिविवर्जितानां निर्वाणभूमिस्थिताः स्मः इत्यात्मनः ~~संजानताम्, ते भगवतोऽन्तिकादिममेवंरूपमश्रुतपूर्वंधर्मं श्रुत्वा कथंकथामापन्नाः ।~~ तत्साधु भगवान् भाषतामेषां भिक्षुणां कौकृत्यविनोदनार्थं यथा भगवन्नेताश्चतस्रः पर्षदो निष्काङ्क्षा निर्विचिकित्सा भवेयुः ॥

(सद्धर्मपुण्डरीकसूत्रे)

V.

क्षणसंपदियं सुदुर्लभा
प्रतिलब्धा पुरुषार्थसाधनी ।
यदि नात्र विचिन्त्यते हितं
पुनरप्येष समागमः कुतः ॥ ४

रात्रौ यथा मेघघनान्धकारे
विद्युत्क्षणं दर्शयति प्रकाशं ।
बुद्धानुभावेन तथा कदाचिल्-
लोकस्य पुण्येषु मतिः क्षणं स्यात् ॥ ५

तस्माच्छुभं दुर्बलमेव नित्यं
बलं तु पापस्य महत्सुघोरं ।
तज्जीयतेऽन्येन शुभेन केन
संबोधिचित्तं यदि नाम न स्यात् ॥ ६

कल्पाननल्पान् प्रविचिन्तयद्भि-
र्दृष्टं मुनीन्द्रैर्हितमेतदेव ।
यतः सुखेनैव सुखं प्रवृद्ध-
मुत्प्लावयत्यप्रमिताञ्जनौघान् ॥ ७

(बोधिचर्यावतारे)

अमात्या पृच्छीयन्ति। कस्येमानि अण्डकानि अमात्या आहुः। एतेषां खु शाकुन्तिका पृच्छीयन्ति। एतेषामत्र विषयो। शाकुन्तिका शब्दापिता। शाकुन्तिका राज्ञा पृच्छीयन्ति। राजा आह। भो भणे जानाथ कस्य इमान्यण्डकानि ते तत्र चरिता शाकुन्तिकाः सर्वेषां पक्षीजातानी अण्डकानां विधिज्ञा पक्षीणां पि विधिज्ञा यो यादृशो पक्षीति। ते आहन्सु। महाराज इमानि त्रीण्यण्डकानि एकमुलूकीये द्वितीयं शारिकाये तृतीयं शुकीये।

(महावस्तु अवदानं - त्रिशकुनि जातकम्) .

02. "කාව්‍යකරණයට අදාළ සිද්ධාන්ත ඉතා ක්‍රමවත්ව කාව්‍යාදර්ශය තුළ ඉදිරිපත් කර ඇත." සෝදාහරණ ව සනාථ කරන්න. (ලකුණු 20යි.)

03. "රසය හා නාට්‍ය අතර ඇත්තේ අවියෝජනීය සබඳතාවකි." ඔබේ අදහස් දක්වන්න. (ලකුණු 20යි.)

04. නාට්‍යයක ව්‍යූහයට අදාළ මූලික සිද්ධාන්ත නාට්‍යශාස්ත්‍රය ඇසුරෙන් සාකච්ඡා කරන්න. (ලකුණු 20යි.)

05. පහත සඳහන් වෘත්ත අතුරෙන් පහක ලක්ෂ්‍ය ලක්ෂණ පැහැදිලි කරන්න. (ලකුණු 20යි.)

i. ඉන්ද්‍රවජ්‍රා ii. තෝටක iii. වසන්තතිලකා iv. ශාර්දූලවික්‍රීඩිත

v. ජඝනචපලා vi. ප්‍රියංවදා vii. මාලිනී viii. විපුලා

ix ආර්යා ද්විතීයාර්ධය x. උපේන්ද්‍රවජ්‍රා

06. "මහායාන බෞද්ධ සම්ප්‍රදායයෙහි මූලික ඉගැන්වීම් අධ්‍යයනයේ දී සද්ධර්මපුණ්ඩරීක සූත්‍රය වැදගත් මූලාශ්‍රයක් වේ." සෝදාහරණ ව තහවුරු කරන්න. (ලකුණු 20යි.)

07. "ලලිත විස්තරය තුළ හමුවන බෝධිසත්ත්ව චරිතාපදානය අතිශයෝක්තිවලින් පිරී ඇත." සනාථ කරන්න. (ලකුණු 20යි.)

08. බෝධිචර්යාවතාරය බෝධිසත්ත්ව ශික්ෂණයෙහිලා කෙතෙක් දුරට මූලාශ්‍රයක් වශයෙන් වැදගත් වන්නේ දැයි විමර්ශනය කරන්න. (ලකුණු 20යි.)